# Raghuvansha by Kalidas Chapter 3

# રઘુવંશં સર્ગઃ ૩ કાલિદાસકૃતમ્

## Document Information

```
Text title : raghuvansha3
File name : raghuvansha3.itx
Category : major_works, kAlidAsa
Location : doc_z_misc_major_works
Author : kalidasa
Transliterated by : Mrs and Mr H Desiraju Rao and Arvind Kolhatkar akolhatkar at
rogers.com
Proofread by : Arvind Kolhatkar akolhatkar at rogers.com
Latest update : April 28, 2005
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૩ કાલિદાસકૃતમ્

અથેપ્સિતં ભર્તુરુપસ્થિતોદયં સખીજનોદ્વીક્ષણકૌમુદીમુખમ્ ।
નિદાનમિક્ષ્વાકુકુલસ્ય સંતતેઃ સુદક્ષિણા દૌહૃદલક્ષણં દધૌ ॥ ૩-૧॥

શરીરસાદાદસમગ્રભૂષણા મુખેન સાલક્ષ્યત લોધ્રપાણ્ડુના ।
તનુપ્રકાશેન વિચેયતારકા પ્રભાતકલ્પા શશિનેવ શર્વરી ॥ ૩-૨॥

તદાનનં મૃત્સુરભિ ક્ષિતીશ્વરો રહસ્યુપાઘ્રાય ન તૃપ્તિમાયયૌ ।
કરીવ સિક્તં પૃષતૈઃ પયોમુચાં શુચિવ્યપાયે વનરાજિપલ્વલમ્ ॥ ૩-૩॥

દિવં મરુત્વાનિવ ભોક્ષ્યતે ભુવં દિગન્તવિશ્રાન્તરથો હિ તત્સુતઃ ।
અતોઽભિલાષે પ્રથમં તથાવિધે મનો બબન્ધાન્યરસાન્વિલઙ્ઘ્ય સા ॥ ૩-૪॥

ન મે હ્રિયા શંસતિ કિંચિદીપ્સિતં સ્પૃહાવતી વસ્તુષુ કેષુ માગધી ।
ઇતિ સ્મ પૃચ્છત્યનુવેલમાદૃતઃ પ્રિયાસખીરુત્તરકોસલેશ્વરઃ ॥ ૩-૫॥

ઉપેત્ય સા દોહદદુઃખશીલતાં યદેવ વવ્રે તદપશ્યદાહૃતમ્ ।
ન હીષ્ટમસ્ય ત્રિદિવેઽપિ ભૂપતેરભૂદનાસાદ્યમધિજ્યધન્વનઃ ॥ ૩-૬॥

ક્રમેણ નિસ્તીર્ય ચ દોહદવ્યથાં પ્રચીયમાનાવયવા રરાજ સા ।
પુરાણપત્રાપગમાદનન્તરં લતેવ સંનદ્ધમનોજ્ઞપલ્લવા ॥ ૩-૭॥

દિનેષુ ગચ્છત્સુ નિતાન્તપીવરં તદીયમાનીલમુખં સ્તનદ્વયમ્ ।
તિરશ્ચકાર ભ્રમરાભિનીલયોઃ સુજાતયોઃ પઙ્કજકોશયોઃ શ્રિયમ્ ॥ ૩-૮॥

નિધાનગર્ભામિવ સાગરામ્બરાં શમીમિવાભ્યન્તરલીનપાવકામ્ ।
નદીમિવાન્તઃસલિલાં સરસ્વતીં નૃપઃ સસત્ત્વાં મહિષીમમન્યત ॥ ૩-૯॥

પ્રિયાનુરાગસ્ય મનઃ સમુન્નતેર્ભુજાર્જિતાનાં ચ દિગન્તસંપદામ્ ।
યથાક્રમં પુંસવનાદિકાઃ ક્રિયા ધૃતેશ્ચ ધીરઃ સદૃશીર્વ્યધત્ત સઃ ॥ ૩-૧૦॥

સુરેન્દ્રમાત્રાશ્રિતગર્ભગૌરવાત્પ્રયત્નમુક્તાસનયા ગૃહાગતઃ ।
તયોપચારાઞ્જલિખિન્નહસ્તયા નનન્દ પારિપ્લવનેત્રયા નૃપઃ ॥ ૩-૧૧॥

કુમારભૃત્યાકુશલૈરનુષ્ઠિતે ભિષગ્ભિરાપ્તૈરથ ગર્ભભર્મણિ ।
પતિઃ પ્રતીતઃ પ્રસવોન્મુખીં પ્રિયાં દદર્શ કાલે દિવમભ્રિતામિવ ॥ ૩-૧૨॥

ગ્રહૈસ્તતઃ પઞ્ચભિરુચ્ચસંસ્થિતૈરસૂર્યગૈઃ સૂચિતભાગ્યસંપદમ્ ।
અસૂત પુત્રં સમયે શચીસમા ત્રિસાધના શક્તિરિવાર્થમક્ષયમ્ ॥ ૩-૧૩॥

દિશઃ પ્રસેદુર્મરુતો વવુઃ સુખાઃ પ્રદક્ષિણાર્ચિર્હવિરગ્નિરાદદે ।
બભૂવ સર્વં શુભશંસિ તત્ક્ષણં ભવો હિ લોકાભ્યુદયાય તાદૃશામ્ ॥ ૩-૧૪॥

અરિષ્ટશય્યાં પરિતો વિસારિણા સુજન્મનસ્તસ્ય નિજેન તેજસા ।
નિશીથદીપાઃ સહસા હતત્વિષો બભૂવુરાલેખ્યસમર્પિતા ઇવ ॥ ૩-૧૫॥

જનાય શુદ્ધાન્તચરાય શંસતે કુમારજન્મામૃતસંમિતાક્ષરમ્ ।
આદેયમાસીત્ત્રયમેવ ભૂપતેઃ શશિપ્રભં છત્રમુભે ચ ચામરે ॥ ૩-૧૬॥

નિવાતપદ્મસ્તિમિતેન ચક્ષુષા નૃપસ્ય કાન્તં પિબતઃ સુતાનનમ્ ।
મહોદધેઃ પૂર ઇવેન્દુદર્શનાદ્ગુરુઃ પ્રહર્ષઃ પ્રબભૂવ નાત્મનિ ॥ ૩-૧૭॥

સ જાતકર્મણ્યખિલે તપસ્વિના તપોવનાદેત્ય પુરોધસા કૃતે ।
દિલીપસૂનુર્મણિરાકરોદ્ભવઃ પ્રયુક્તસંસ્કાર ઇવાધિકં બભૌ ॥ ૩-૧૮॥

સુખશ્રવા મઙ્ગલતૂર્યનિસ્વનાઃ પ્રમોદનૃત્યૈઃ સહ વારયોષિતામ્।
ન કેવલં સદ્મનિ માગધીપતેઃ પથિ વ્યજૃમ્ભન્ત દિવૌકસામપિ ॥ ૩-૧૯॥

ન સંયતસ્તસ્ય બભૂવ રક્ષિતુર્વિસર્જયેદ્યં સુતજન્મહર્ષિતઃ ।
ઋણાભિધાનાત્સ્વયમેવ કેવલં તદા પિતૃણાં મુમુચે સ બન્ધનાત્ ॥ ૩-૨૦॥

શ્રુતસ્ય યાયાદયમન્તમર્ભકઃ તથા પરેષાં યુધિ ચેતિ પાર્થિવઃ ।
અવેક્ષ્ય ધાતોર્ગમનાર્થમર્થવિચ્ચકાર નામ્ના રઘુમાત્મસમ્ભવમ્ ॥ ૩-૨૧॥

પિતુઃ પ્રયત્નાત્સ સમગ્રસંપદઃ શુભૈઃ શરીરાવયવૈર્દિને દિને ।
પુપોષ વૃદ્ધિં હરિદશ્વદીધિતેરનુપ્રવેશાદિવ બાલચન્દ્રમાઃ ॥ ૩-૨૨॥

ઉમાવૃષાઙ્કૌ શરજન્મના યથા યથા જયન્તેન શચીપુરન્દરૌ ।
તથા નૃપઃ સા ચ સુતેન માગધી નનન્દતુસ્તત્સદૃશેન તત્સમૌ ॥ ૩-૨૩॥

રથાઙ્ગનામ્નોરિવ ભાવબન્ધનં બભૂવ યત્પ્રેમ પરસ્પરાશ્રયમ્ ।
વિભક્તમપ્યેકસુતેન તત્તયોઃ પરસ્પરસ્યોપરિ પર્યચીયત ॥ ૩-૨૪॥

ઉવાચ ધાત્ર્યા પ્રથમોદિતં વચો યયૌ તદીયામવલમ્બ્ય ચાઙ્ગુલિમ્ ।
અભૂચ્ચ નમ્રઃ પ્રણિપાતશિક્ષયા પિતુર્મુદં તેન તતાન સોઽર્ભકઃ ॥ ૩-૨૫॥

તમઙ્કુમારોપ્ય શરીરયોગજૈઃ સુખૈર્નિષિઞ્ચન્તમિવામૃતં ત્વચિ ।
ઉપાન્તસંમીલિતલોચનો નૃપશ્ચિરાત્સુતસ્પર્શરસજ્ઞતાં યયૌ ॥ ૩-૨૬॥

અમંસ્ત ચાનેન પરાર્ધ્યજન્મના સ્થિતેરભેત્તા સ્થિતિમન્તમન્વયમ્ ।
સ્વમૂર્તિભેદેન ગુણાગ્ર્યવર્તિના પતિઃ પ્રજાનામિવ સર્ગમાત્મનઃ ॥ ૩-૨૭॥

સ વૃત્તચૂલશ્ચલકાકપક્ષકૈરમાત્યપુત્રૈઃ સવયોભિરન્વિતઃ ।
લિપેર્યથાવદ્ગ્રહણેન વાઙ્મયં નદીમુખેનેવ સમુદ્રમાવિશત્ ॥ ૩-૨૮॥

અથોપનીતં વિધિવદ્વિપશ્ચિતો વિનિન્યુરેનં ગુરવો ગુરુપ્રિયમ્ ।
અવન્ધ્યયત્નાશ્ચ બભૂવુરત્ર તે ક્રિયા હિ વસ્તૂપહિતા પ્રસીદતિ ॥ ૩-૨૯॥

ધિયઃ સમગ્રૈઃ સ ગુણૈરુદારધીઃ ક્રમાચ્ચતસ્રશ્ચતુરર્ણવોપમાઃ ।
તતાર વિદ્યાઃ પવનાતિપાતિભિર્દિશો હરિદ્ભિર્હરિતામિવેશ્વરઃ ॥ ૩-૩૦॥

ત્વચં ચ મેધ્યાં પરિધાય રૌરવીમશિક્ષતાસ્ત્રં પિતુરેવ મન્ત્રવત્ ।
ન કેવલં તદ્ગુરુરેકપાર્થિવઃ ક્ષિતાવભૂદેકધનુર્ધરોઽપિ સઃ ॥ ૩-૩૧॥

મહોક્ષતાં વત્સતરઃ સ્પૃશન્નિવ દ્વિપેન્દ્રભાવં કલભઃ શ્રયન્નિવ ।
રઘુઃ ક્રમાદ્યૌવનભિન્નશૈશવઃ પુપોષ ગામ્ભીર્યમનોહરં વપુઃ ॥ ૩-૩૨॥

અથાસ્ય ગોદાનવિધેરનન્તરં વિવાહદીક્ષાં નિરવર્તયદ્ગુરુઃ ।
નરેન્દ્રકન્યાસ્તમવાપ્ય સત્પતિં તમોનુદં દક્ષસુતા ઇવાબભુઃ ॥ ૩-૩૩॥

યુવા યુગવ્યાયતબાહુરંસલઃ કવાટવક્ષાઃ પરિણદ્ધકંધરઃ ।
વપુઃપ્રકર્ષાદજયદ્ગુરું રઘુસ્તથાપિ નીચૈર્વિનયાદદૃશ્યત ॥ ૩-૩૪॥

તતઃ પ્રજાનાં ચિરમાત્મના ધૃતાં નિતાન્તગુર્વીં લઘયિષ્યતા ધુરમ્ ।
નિસર્ગસંસ્કારવિનીત ઇત્યસૌ નૃપેણ ચક્રે યુવરાજશબ્દભાક્ ॥ ૩-૩૫॥

નરેન્દ્રમૂલાયતનાદનન્તરં તદાસ્પદં શ્રીર્યુવરાજસંજ્ઞિતમ્ ।
અગચ્છદંશેન ગુણાભિલાષિણી નવાવતારં કમલાદિવોત્પલમ્ ॥ ૩-૩૬॥

વિભાવસુઃ સારથિનેવ વાયુના ઘનવ્યપાયેન ગભસ્તિમાનિવ ।
બભૂવ તેનાતિતરાં સુદુઃસહઃ કટપ્રભેદેન કરીવ પાર્થિવઃ ॥ ૩-૩૭॥

નિયુજ્ય તં હોમતુરંગરક્ષણે ધનુર્ધરં રાજસુતૈરનુદ્રુતમ્ ।
અપૂર્ણમેકેન શતક્રતૂપમઃ શતં ક્રતૂનામપવિઘ્નમાપ સઃ ॥ ૩-૩૮॥

તતઃ પરં તેન મખાય યજ્વના તુરંગમુત્સૃષ્ટમનર્ગલં પુનઃ ।

ધનુર્ભૃતામગ્રત એવ રક્ષિણાં જહાર શક્રઃ કિલ ગૂઢવિગ્રહઃ ॥ ૩-૩૯॥

વિષાદલુપ્તપ્રતિપત્તિ વિસ્મિતં કુમારસૈન્યં સપદિ સ્થિતં ચ તત્ ।
વસિષ્ઠધેનુશ્ચ યદૃચ્છયાગતા શ્રુતપ્રભાવા દદૃશેઽથ નન્દિની ॥ ૩-૪૦॥

તદઙ્ગનિસ્યન્દનજલેન લોચને પ્રમૃજ્ય પુણ્યેન પુરસ્કૃતઃ સતામ્ ।
અતીન્દ્રિયેષ્વપ્યુપપન્નદર્શનો બભૂવ ભાવેષુ દિલીપનન્દનઃ ॥ ૩-૪૧॥

સ પૂર્વતઃ પર્વતપક્ષશાતનં દદર્શ દેવં નરદેવસંભવઃ ।
પુનઃ પુનઃ સૂતનિષિદ્ધચાપલં હરન્તમશ્વં રથરશ્મિસંયુતમ્ ॥ ૩-૪૨॥

શતૈસ્તમક્ષ્ણામનિમેષવૃત્તિભિર્હરિં વિદિત્વા હરિભિશ્ચ વાજિભિઃ ।
અવોચદેનં ગગનસ્પૃશા રઘુઃ સ્વરેણ ધીરેણ નિવર્તયન્નિવ ॥ ૩-૪૩॥

મખાંશભાજાં પ્રથમો મનીષિભિસ્ત્વમેવ દેવેન્દ્ર સદા નિગદ્યસે ।
અજસ્રદીક્ષાપ્રયતસ્ય મદ્ગુરોઃ ક્રિયાવિઘાતાય કથં પ્રવર્તસે ॥ ૩-૪૪॥

ત્રિલોકનાથેન સદા મખદ્વિષસ્ત્વયા નિયમ્યા નનુ દિવ્યચક્ષુષા ।
સ ચેત્સ્વયં કર્મસુ ધર્મચારિણાં ત્વમન્તરાયો ભવસિ ચ્યુતો વિધિઃ ॥ ૩-૪૫॥

તદઙ્ગમગ્ર્યં મઘવન્મહાક્રતોરમું તુરંગં પ્રતિમોક્તુમર્હસિ ।
પથઃ શ્રુતેર્દર્શયિતાર ઈશ્વરા મલીમસામદદતે ન પદ્ધતિમ્ ॥ ૩-૪૬॥

ઇતિ પ્રગલ્ભં રઘુણા સમીરિતં વચો નિશમ્યાધિપતિર્દિવૌકસામ્ ।
નિવર્તયામાસ રથં સવિસ્મયઃ પ્રચક્રમે ચ પ્રતિવક્તુમુત્તરમ્ ॥ ૩-૪૭॥

યદાત્થ રાજન્યકુમાર તત્તથા યશસ્તુ રક્ષ્યં પરતો યશોધનૈઃ ।
જગત્પ્રકાશં તદશેષમિજ્યયા ભવદ્ગુરુર્લઙ્ઘયિતું મમોદ્યતઃ ॥ ૩-૪૮॥

હરિર્યથૈકઃ પુરુષોત્તમઃ સ્મૃતો મહેશ્વરસ્ત્ર્યમ્બક એવ નાપરઃ ।
તથા વિદુર્માં મુનયઃ શતક્રતું દ્વિતીયગામી ન હિ શબ્દ એષ નઃ ॥ ૩-૪૯॥

અતોઽયમશ્વઃ કપિલાનુકારિણા પિતુસ્ત્વદીયસ્ય મયાપહારિતઃ ।
અલં પ્રયત્નેન તવાત્ર મા નિધાઃ પદં પદવ્યાં સગરસ્ય સંતતેઃ ॥ ૩-૫૦॥

તતઃ પ્રહાસ્યાપભયઃ પુરન્દરં પુનર્બભાષે તુરગસ્ય રક્ષિતા ।
ગૃહાણ શસ્ત્રં યદિ સર્ગ એષ તે ન ખલ્વનિર્જિત્ય રઘું કૃતી ભવાન્ ॥ ૩-૫૧॥

સ એવમુક્ત્વા મઘવન્તમુન્મુખઃ કરિષ્યમાણઃ સશરં શરાસનમ્ ।
અતિષ્ઠદાલીઢવિશેષશોભિના વપુઃપ્રકર્ષેણ વિડમ્બિતેશ્વરઃ ॥ ૩-૫૨॥

રઘોરવષ્ટમ્ભમયેન પત્રિણા હૃદિ ક્ષતો ગોત્રભિદપ્યમર્ષણઃ ।
નવામ્બુદાનીકમુહૂર્તલાઞ્છને ધનુષ્યમોઘં સમધત્ત સાયકમ્ ॥ ૩-૫૩॥

દિલીપસૂનોઃ સ બૃહદ્ભુજાન્તરં પ્રવિશ્ય ભીમાસુરશોણિતોચિતઃ ।
પપાવનાસ્વાદિતપૂર્વમાશુગઃ કુતૂહલેનેવ મનુષ્યશોણિતમ્ ॥ ૩-૫૪॥

હરેઃ કુમારોઽપિ કુમારવિક્રમઃ સુરદ્વિપાસ્ફાલનકર્કશાઙ્ગુલૌ ।
ભુજે શચીપત્રવિશેષકાઙ્કિતે સ્વનામચિહ્નં નિચખાન સાયકમ્ ॥ ૩-૫૫॥

જહાર ચાન્યેન મયૂરપત્રિણા શરેણ શક્રસ્ય મહાશનિધ્વજમ્ ।
ચુકોપ તસ્મૈ સ ભૃશં સુરશ્રિયઃ પ્રસહ્ય કેશવ્યપરોપણાદિવ ॥ ૩-૫૬॥

તયોરુપાન્તસ્થિતસિદ્ધસૈનિકં ગરુત્મદાશીવિષભીમદર્શનૈઃ ।
બભૂવ યુદ્ધં તુમુલં જયૈષિણોરધોમુખૈરૂર્ધ્વમુખૈશ્ચ પત્રિભિઃ ॥ ૩-૫૭॥

અતિપ્રબન્ધપ્રહિતાસ્ત્રવૃષ્ટિભિસ્તમાશ્રયં દુષ્પ્રસહસ્ય તેજસઃ ।
શશાક નિર્વાપયિતું ન વાસવઃ સ્વતશ્ચ્યુતં વહ્નિમિવાદ્ભિરમ્બુદઃ ॥ ૩-૫૮॥

તતઃ પ્રકોષ્ઠે હરિચન્દનાઙ્કિતે પ્રમથ્યમાનાર્ણવધીરનાદિનીમ્ ।
રઘુઃ શશાઙ્કાર્ધમુખેન પત્રિણા શરાસનજ્યામલુનાદ્બિડૌજસઃ ॥ ૩-૫૯॥

સ ચાપમુત્સૃજ્ય વિવૃદ્ધમત્સરઃ પ્રણાશનાય પ્રબલસ્ય વિદ્વિષઃ ।
મહીધ્રપક્ષવ્યપરોપણોચિતં સ્ફુરત્પ્રભામણ્ડલમસ્ત્રમાદદે ॥ ૩-૬૦॥

રઘુર્ભૃશં વક્ષસિ તેન તાડિતઃ પપાત ભૂમૌ સહ સૈનિકાશ્રુભિઃ ।
નિમેષમાત્રાદવધૂય ચ વ્યથાં સહોત્થિતઃ સૈનિકહર્ષનિસ્વનૈઃ ॥ ૩-૬૧॥

તથાપિ શસ્ત્રવ્યવહારનિષ્ઠુરે વિપક્ષભાવે ચિરમસ્ય તસ્થુષઃ ।
તુતોષ વીર્યાતિશયેન વૃત્રહા પદં હિ સર્વત્ર ગુણૈર્નિધીયતે ॥ ૩-૬૨॥

અસઙ્ગમદ્રિષ્વપિ સારવત્તયા ન મે ત્વદન્યેન વિસોઢમાયુધમ્ ।
અવેહિ માં પ્રીતમૃતે તુરઙ્ગમાત્કિમિચ્છસીતિ સ્ફુટમાહ વાસવઃ ॥ ૩-૬૩॥

તતો નિષઙ્ગાદસમગ્રમુદ્ધૃતં સુવર્ણપુઙ્ખદ્યુતિરઞ્જિતાઙ્ગુલિમ્ ।
નરેન્દ્રસૂનુઃ પ્રતિસંહરન્નિષું પ્રિયંવદઃ પ્રત્યવદત્સુરેશ્વરમ્ ॥ ૩-૬૪॥

અમોચ્યમશ્વં યદિ મન્યસે પ્રભો તતઃ સમાપ્તે વિધિનૈવ કર્મણિ ।
અજસ્રદીક્ષાપ્રયતઃ સ મદ્ગુરુઃ ક્રતોરશેષેણ ફલેન યુજ્યતામ્ ॥ ૩-૬૫॥

યથા સ વૃત્તાન્તમિમં સદોગતસ્ત્રિલોચનૈકાંશતયા દુરાસદઃ ।
તવૈવ સંદેશહરાદ્વિશાંપતિઃ શ્ૃણોતિ લોકેશ તથા વિધીયતામ્ ॥ ૩-૬૬॥

તથેતિ કામં પ્રતિશુશ્રુવાન્રઘોર્યથાગતં માતલિસારથિર્યયૌ ।
નૃપસ્ય નાતિપ્રમનાઃ સદોગૃહં સુદક્ષિણાસૂનુરપિ ન્યવર્તત ॥ ૩-૬૭॥

તમભ્યનન્દત્પ્રથમં પ્રબોધિતઃ પ્રજેશ્વરઃ શાસનહારિણા હરેઃ ।
પરામૃશન્હર્ષજડેન પાણિના તદીયમઙ્ગં કુલિશવ્રણાઙ્કિતમ્ ॥ ૩-૬૮॥

ઇતિ ક્ષિતીશો નવતિં નવાધિકાં મહાક્રતૂનાં મહનીયશાસનઃ ।
સમારુરુક્ષુર્દિવમાયુષઃ ક્ષયે તતાન સોપાનપરમ્પરામિવ ॥ ૩-૬૯॥

અથ સ વિષયવ્યાવૃત્તાત્મા યથાવિધિ સૂનવે
નૃપતિકકુદં દત્ત્વા યૂને સિતાતપવારણમ્ ।
મુનિવનતરુચ્છાયાં દેવ્યા તયા સહ શિશ્રિયે
ગલિતવયસામિક્ષ્વાકૂણામિદં હિ કુલવ્રતમ્ ॥ ૩-૭૦॥

॥ ઇતિ શ્રીકાલિદાસકૃતે રઘુવંશે મહાકાવ્યે રાજ્યાભિષેકો નામ તૃતીયઃ સર્ગઃ ॥

Encoding by
Arvind Kolhatkar and Mrs. and Mr. Desriraju H. Rao.
Proofread and corrected by
Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha by Kalidas Chapter 3*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*